यथा—“ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुतः। कश्यपस्तस्य पुत्रोऽभूत् कश्यपानात् स कश्यपः” मार्कण्डे० पु०। तस्य वंशादिकथा “ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः। मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। मरीचेः कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः। प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश। अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा। क्रोधा प्रधा च विश्वा च विनता कपिला मुनिः। कद्रूश्च मनुजव्याघ्र! दक्षकन्यैव भारत!। एतासां वीर्य्यसम्पन्नं पुत्रपौत्रप्रपौत्रकम्” भा० आ० ६५ अ०। एतासामपत्यभेदास्तत्तच्छब्दे दृश्याः। “कश्यपाय त्रयोदश:” मनुः।

तस्य च वंशादिकथा भाग० अन्यथैवोक्ता यथा—“पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा। कश्यपं पौर्णमासं च यापूरितं जगत्” भाग० ४,१,११ श्लो० इत्युक्त्वा तत्पत्नीनां दक्षप्रजापतिकन्यानां नामभेदः नामान्तरेण तार्क्ष्यनामकस्य तस्य च अन्या अपि चतस्रः दक्षकन्याः पत्न्य आसन्” इति ६ स्क० उक्तं यथा-“ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयम्भुवा। षष्टिं संजनयामास दुहितॄः पितृवत्सलाः। दश धर्माय कायेन्दोर्द्विषट् त्रिनव दत्तवान्। भूताङ्गिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः “नामधेयान्यमूषां त्वं सापत्यानाञ्च मे शृणु” इत्युपक्रमे (काय कश्यपाय द्विषट् षट्द्विगुणाः द्वादश त्रयोदशेत्यर्थः श्रीधरः) उत्तरत्रादित्यादीनां त्रयोदशानां वंशकीर्त्तनत्त्वथार्थः। “तार्क्ष्याय नामान्तरं प्राप्ताय कश्यपायैव अपरा अवशिष्टाश्चतस्रः इति” श्रीधरः) “तार्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनीत्यपि। पतङ्ग्यसूत पतगान् यामिनी शलभानथ। सुपर्णाऽ (विनता) सूत गरुडं साक्षाद् यज्ञेशवाहनम्। सूर्य्यसूतमनूरुञ्च कद्रूर्नागाननेकशः” इति। तार्क्ष्यनामककश्यपस्य पत्नीपुत्रानुक्त्वा प्रसिद्धनामककश्यपस्य पत्नीपुत्रनामादिकमुक्तं यथा तत्रैव

“अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत्। अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला। मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः। तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः। सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप!। ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः। दन्दशूकादयः सर्पा राजन्!। क्रोधवशात्मजाः। इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः। अरिष्टायास्तु गन्धर्वाः काष्ठाया द्विशफेतराः। सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु। द्विमूर्द्धा शम्बरोऽरिष्टो हयग्रीवो विभावसुः। अयोमुखः शङ्कुशिराः स्वर्भानुः कपिलोऽरुणः। पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः। धूम्रकेशो विरूपाक्षो विप्रचित्तिश्च दुर्जयः। स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल। वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली। वैश्वानरसुतायाश्च चतस्रश्चारुदर्शनाः। उपदानवी हयशिरा पुलोमा कालका तथा। उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप। पुलोमा कालका च द्वे वैश्वानरसुते तु कः। उपयेमेऽथ भगवान् कश्यपो ब्रह्मनोदितः। पौलमाः कालकेयाश्च दानवा युद्धशालिनः। तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता (अर्जुनः)। जघान स्वर्गतो राजन्नेक इन्द्रप्रियङ्करः। विप्रचित्तिः सिंहिकायां शतञ्चैकमजीजनत्। राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागताः। अथातः श्रूयतां वंशो योऽदितेरनुपूर्वशः। यत्र नारायणो देवः स्वांशेनावतरद्विभुः। विवस्वानर्य्यमा पूषा त्वष्टाऽथ सविता भगः। धाता विधाता वरुणो मित्रः शक्र उरुक्रमः। विवस्वतः श्राद्धदेवं संज्ञाऽसूयत वै मनुम्। मिथुनञ्च महाभागा यमं च यमुनां तथा। सैव भूत्वाथ बड़वा नासत्यौ सुषुवे भुवि। छाया शनैश्चरं लेभे सावर्णिञ्च मनुं ततः। कन्यां च तपतीं या वै वव्रे संवरणं पतिम्। अर्य्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः। यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता। पूषानपत्यः पिष्टादो भग्नदन्तोऽभवत् पुरा। योऽसौ दक्षाय कुपितं जहास विवृतद्विजः। त्वष्टुर्दैत्यात्मजा भार्य्या रचना नाम कन्यका। सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्य्यवान्। तं वव्रिरे सुरगणाः स्वस्रीयं द्विषतामपि। विमतेन परित्यक्ता गुरुणाङ्गिरसेन यत्” भाग० ६,६ अ०। कश्यपस्यैव तत्पत्नीनामपि नामान्तरकल्पनया विरोधः परिहरणीयः।

तस्य पृथिव्याः प्रतिग्रहरूपेण प्राप्तिकथादि भा० हरिवं० ५३। यथा “भार्गवेण पितुः श्राद्धे कश्यपाय निवेदिता। मांसमेदोऽस्थिदुर्गन्धा दिग्धा क्षत्रियशोणितैः। रजस्वलेव युवतिः कश्यपं समुपस्थिता। स मां ब्रह्मर्षिरप्याह किं सुवि! त्वमवाङ्मुखी। वीरपत्नीव्रतमिदं धारयन्ती विषीदसि। साहं विज्ञापितवती कश्यपं लोकभावनम्। पतयो मे हता ब्रह्मन्! भार्गवेण महात्मना। साहं विहीना